यान्यपत्यानि तेषां गोत्रमेते सप्त ऋषय इति VīraMi.(Saṁskāra.) 592. 13; समानगोत्रत्वलक्षणं बौधायनेन कृतम् । तच्चागस्त्याष्टमसप्तर्षीनधिकृत्य VīraMi.(Saṁskāra.) 597 .8; अगस्त्याष्टमसप्तर्षिगोत्राः परस्परं भिन्नगोत्रीयाः VīraMi.(Saṁskāra.) 605. 15.

**अगस्त्युदित** ( agasty-udita ) *adj.* spoken by Agasti श्रुत्वागस्त्युदितं वाक्यं तारकारिरुवाच ह SkandP. iv. 93. 16; *n.* Agasti's words इत्यगस्त्युदितं श्रुत्वा महादेवतनूद्भवः । कथयामास SkandP. iv. 70. 3.

**अगस्त्येश** ( agastyeśa ) *n.* name of a particular *liṅga* (of S'iva) दृष्ट्वा लिङ्गं तदर्चितम् । अगस्त्येश इति ख्यातं सुवर्णमुखरीतटे SkandP. ii(1). 5. 39; एतस्मिन्नन्तरे कन्या अगस्त्येशं समर्च्य च । आगता धरणीं द्रष्टुम् SkandP. ii(1). 6. 70; ii(1). 34. 18.

**अगस्त्येशमण्टप** ( agastyeśa-maṇṭapa ) *m.* a hall for (the S'ivaliṅga called) Agastyeśa शाके वस्वग्निवेदेन्दुगण्ये(ऽ)गस्त्येशमण्टपम्⋯कृतवानप्पमंत्रिराट् EI. vi. 133. 256.

**अगस्त्येशसमीपतस्** ( agastyeśasamīpa-tas ) *adv.* from the vicinity of ( the S'ivaliṅga called ) Agastyeśa सा ⋯ अवतीर्यारुणाद्श्वादगस्त्येशसमीपतः SkandP. ii(1). 5. 63.

**अगस्त्येश्वर** ( agastyeśvara ) *m.* name of a *liṅga* (of S'iva) तत्रागस्त्येश्वरं दृष्ट्वा मुच्यते ब्रह्महत्यया VāyuP. ii. 46. 55; दृष्ट्वागस्त्येश्वरं लिङ्गमगस्त्येन सुपूजितम् । ⋯ विशश्राम नदीतटे SkandP. ii(1). 5. 63; अगस्त्येश्वरमुख्यानां लिङ्गानाम्⋯नामानि ⋯ शृणु । अगस्त्येश्वर आख्यातो गुहेश्वरस्ततः परम् SkandP. v(1). 70. 74; v(2). 1. 51; *n.* name of a *tīrtha* or a sacred place ततो गच्छेत्तु राजेन्द्र तीर्थम्⋯अगस्त्येश्वरमुत्तमम् MatsyaP. 191. 15; PadmP. i. 18. 16; जायते दाता सार्वभौमो महीपतिः । यस्त्वगस्त्येश्वरं गच्छेदेकचित्तो नरो मुने SkandP. v(1). 35. 6.

**अगस्त्येश्वरतीर्थ** (agastyeśvara-tīrtha ) *n.* name of a sacred place [PW]

**अगस्त्येश्वरदेव** ( agastyeśvara-deva ) *m.* the deity (called) Agastyeśvara अगस्त्येश्वरदेवोऽपि विख्यातो भुवनत्रये SkandP. v(2). 1. 48.

**अगस्त्येश्वरनामतस्** ( agastyeśvaranāma-tas ) *adv.* by the name Agastyeśvara शिवः । प्रादुर्भूतश्च भगवानगस्त्येश्वरनामतः SaurP. 67. 9.

**अगस्त्येश्वरनामन्** ( agastyeśvara-nāman ) *n.* the name Agastyeśvara अगस्त्येश्वरनामेह कथं लब्धमनेन वै SkandP. v(2). 1. 21.

**अगस्त्योक्त** (agastyokta ) *n.* instruction by Agastya अगस्त्योक्तादभैषज्याद्धरतोऽस्याश्विनावसून् NītiMañ. 60.

**अगस्त्योक्तिरूप** (agastyokti-rūpa ) *adj.* of the nature of Agastya's utterances दशश्लोका अगस्त्योक्तिरूपाः LalitāSaBh. 3. 20.

**अगस्त्योदय** ( agastyodaya ) *m.* the rise (or appearance) of the star Canopus लिङ्गम्⋯शरदि जलप्रसादोऽगस्त्योदयस्येति PadārthaSaṁ. 205. 17; अगस्त्योदये विषशुद्धिः⋯आसीत् Kād. 55. 21; DharmoPra. 115. 13; एकदा च राजा⋯कासधवलगुणोद्भासितमगस्त्योदयं हृदयजलाशयानाम् ⋯ विद्याधरमुनिमपश्यत् TilaMañ. 25. 4; 56. 19; शरदि जलप्रसादोऽगस्त्योदयस्य ( लिङ्गम् ) NyāyKa. 211. 17; यदागस्त्योदये प्राप्ते तदा सप्तसु रात्रिषु । अर्घं दद्यात् ⋯ अगस्त्याय NaraP. 67. 12; नीलोत्पलवतीर्वापीरगस्त्योदयनिर्विषाः । अवगाह्य RājTa.(Ka.) 2. 140; 8. 237; तत्रागस्त्योदयास्तमयमाह ब्रह्मगुप्ताचार्यः AdbhuSāg. 202. 6; जलप्रसादेनागस्त्योदयस्य⋯अनुमानम् Upask. 394. 11 (*on* ix. 2. 2); अगस्त्योदये दिनसप्तकमगस्तिकुण्डे यात्रा TristhaSe. 261. 1; इयं च कन्यार्के अगस्त्योदये च न कार्या VīraMi.(Samaya.) 44. 10.

**अगस्त्योदयनिर्विष** ( agastyodaya-nirviṣa ) *adj.* free from impurities due to the rise of the star Canopus अगस्त्योदयनिर्विषम् । ⋯सलिलम् ⋯ हितम् SuśruS. vi. 64. 19; समस्तादप्यहोरात्रमगस्त्योदयनिर्विषम् । शुचि हंसोदकं नाम ⋯जलम् AṣṭāHṛ. i. 3. 52.

**अगस्त्योदयवेला** ( agastyodaya-velā ) *f.* the time of rise of the star Canopus नरः⋯अगस्त्योदयवेलायां मुच्यते सर्वपातकैः SkandP. v(1). 35. 7.

**अगस्त्योदयावधित्व** ( agastyodayāvadhi-tva ) *n.* the state of having the limit upto the rise of the star Canopus (i. e. until the rise of the star Canopus) अथ नदीनां रजोदोषः ।⋯मात्स्ये त्वगस्त्योदयावधित्वमुक्तम् NirṇaSi. 86. 4.

**अगहन** ( a-gahana ) *adj.* free from distress अप्रतर्क्यभुजवीर्यशालिनः संकटेऽप्यगहनाः VikraDeC. 5. 6.

**अगहन** ( agahana ) *m.* [Hindi?] name of the month Āgrahāyaṇa संवत् १६४८ समये अगहनशुक्लपक्षद्विति(ती)यायां भौमवासरे लिखितं(त)मिदम् VīraBhā. 12. 45.

**अगहनाशय** ( agahanāśaya ) *adj.* whose mind is not unfathomable, having a shallow mind भोगसेनोऽन्यथा मेदं कुर्यादगहनाशयः RājTa.(Ka.) 8. 299.

**अगहृतशेष** ( agahṛta-śeṣa ) *m.* the remainder obtained after dividing (a quantity or number) by seven व्यर्केन्दुकला भक्ताः खरसगुणैर्लब्धमूनमेकेन । चलकरणानि बवादीन्यगहृतशेषम् KhaṇḍKhā. i. 27; BrāhmSphuSi. 2. 66.

**अगह्वर** ( a-gahvara ) *adj.* not deceitful अगह्वरेण धर्मेण तस्माद्गच्छ दिवं द्विज MahāBhā. xiv. 93. 62.

**अगाख्य** ( agākhya ) *adj.* called the immovable (i. e. tree or hill) वृक्षे शाखाः शिलाश्चाग इत्येषा लौकिकी मतिः । अगाख्यपरिशिष्टाङ्गनैरन्तर्योपलम्भनात् TattvSaṁ. 831.

**अगाग्र** ( agāgra ) *n.* top of a hill, peak of a mountain [PW]

**अगाग्रतरु** ( agāgra-taru ) *m.* a tree on the top of a mountain अगमन्नगाग्रतरुषु त्वदीशितुः दिवसाः कथंचिदवशेषितासवः RāmC. 20. 51.

**अगाग्रस्थ** (agāgra-stha ) *adj.* staying on the top of a hill or mountain तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च । शैत्यादगाग्रस्थमपि प्रायेण रसवज्जलम् Rāmā. iii. 15. 23.

[1]**अगाङ्ग** ( agāṅga ) *n.* a part or portion of a mountain रे रे रोरूरुरूरोरुगागोगोऽगाङ्गगोऽगगुः Kāvyāda. 3. 92.

[2]**अगाङ्ग** ( a-gāṅga ) *adj.* not belonging to the Ganges यथान्यत्रागाङ्गे जले गङ्गात्वमारोप्य⋯निषेधस्य संभवात् VedāntRaMañ. 2. 6 (82. 20)

**अगाडुलीक** ( a-gāḍulīka ) *adj.* free from viciousness or wickedness अबालिश्यागाडुलीकमजिरं नृपतेरभाजि DvyāśraKā. 17. 138.

**अगाढ** ( a-gāḍha ) *adj.* **i** not penetrated into, not deep (mind etc.) स्पष्टगूढार्थविज्ञानमगाढ( ? ढं )मन्दचेतसाम् । ⋯ परिकीर्तितम् SuśruS. vi. 66. 16; **ii** not tight ( उष्णीषम् ) शिथिलार्पितम् अगाढबन्धम् VīraMi.(Āhnika.) 242. 8; **iii** not strong, not vehement (feeling etc.) अगाढमदविषया मत्तद्दी AbhinBhā. ii. 101. 18 (*on* 10. 28); **iv** not close, mild, light (as kiss etc.) कलां नेत्रयुगेऽगाढचुम्बनैः परिपीडयेत् S'ṛṅgāDī. 2. 100; **v** not complete, not full, not excessive अगाढपाकानि बदराणि SubhāRaK. 12. 12; अगाढोऽनवगाढे चाप्यभृशे च प्रकीर्तितः NānārthāSaṁ. ii. 41. 4; **vi** not gone deep into, NānārthāSaṁ. ii. 41. 4.

**अगाढता** ( agāḍha-tā ) *f.* not being tight शब्दे साध्ये तदाधिक्यमशैथिल्यमगाढता SamarāSū. 31. 46.

**अगाणिक्य** ( a-gāṇikya ) *adj.* [ *f.* -ā] not belonging to the class (or family) of the courtezan, of noble family तिलकं मङ्गलमये राज्ञो दधिमयं व्यधुः । अग( ? गा )णिक्याः स्त्रियो द्वारि महेऽत्रागणिकामये ( comm. अगाणिक्याः स्त्रियः कुलाङ्गनाः ) DvyāśraKā. 19. 56.

**अगातृ** ( a-gātṛ ) *m.* unskilled chanter (of Sāman) केशिने ⋯ सामाविर्भवत्तदेनमब्रवीदगातारो मा गायन्ति PañcBr. xiii. 10. 8.

**अगात्मजा** ( agātmajā ) *f.* **i** daughter of the (Himālaya) mountain (i. e. Pārvatī) अमियतौ स हिमाचलम्⋯दधतम्⋯शिवमगात्मजया च कृतेर्ष्यया सकलहम् Kirātā. 5. 13; अगात्मजासि गिरिजे नाहं निन्दापरस्तव PadmP. v. 41. 12; प्रगे पुनरगात्मजावचनमीरिता भूभुजा प्रलम्बबकपूतनाप्रमुखदानवा मानिनः Nāräy. x. 39. 7; **ii** a river अगात्मजा⋯नदी S'abdaRa.(Vā.) 679.

**अगात्मजापति** ( agātmajā-pati ) *m.* husband of the daughter of the (Himālaya) mountain (i. e. S'iva, husband of Pārvatī) अन्नमर्पितमगात्मजापतेरस्तु तं प्रति निलिम्पभोजनम् YātrāPra. 2. 72.

**अगात्मजार्ध** ( agātmajārdha ) *adj.* half of which (consists of) the daughter of the mountain (viz. Pārvatī) नागा नागात्मजार्धं न भसितधवलं यद्वपुर्भूषयन्ति Subhāṣi. 97.

**अगादनलोल** ( agādana-lola ) *adj.* eager in eating (i. e. swallowing) the mountain दीप्तिमगादनलोऽलं बिभ्राणो हेतिशतमगादनलोलम् YudhiVi. 3. 11.

**अगादिक्रामिन्** ( agādi-krāmin ) *adj.* who is able to pass over the mountains etc. स जनः⋯अगादिक्रामी Nalo. 4. 6.

**अगादिचोदना** (agādi-codanā) *f.* the (grammatical) rule or injunction relating to (the *pratyāhāras*) *ak* etc. अगादिचोदनासु ईकारादयोऽपि⋯प्रतीयन्ते PadMañ. *on* KāśiVṛ. *on* P. i. 1. 69.

**अगादिसंज्ञा** (agādi-saṁjñā) *f.* the (technical) term *ak* etc. ते ह्यगादिसंज्ञाभिः संज्ञित्वेन प्रत्याख्यन्ते PadMañ. *on* KāśiVṛ. *on* P. i. 1. 69.

**अगाध** (a-gādha) *adj.* [ *f.* -ā] [DEBRU. p. 581] **1** unfathomable, deep **2** inconceivable, beyond one's thoughts **3** without depth, superfecial **4** deep, solemn **5** clear **1** unfathomable, deep तद्ध्रेवतीषु रैवतं पृष्ठं कुर्युरगाधे मज्जेयुः JaimiBr. 3. 145; भिन्ना नौरगाधे महत्युदके संप्लवेत् GopBr. ii. 2. 5; अगाधा गाधा भवति यं मां स्मृत्वा GopāloTāU. 1 (594. 14); RādhU. 211. 13(3); SāmaraU. 267. 16; अगाधे प्रेक्षणं च KauśiGS. i. 9. 16=S'āṅkhāGS. i. 15. 20; भगिन्यौ ⋯ ददृशतुः ⋯ तेऽगाधं निधिमुरुमम्भसाम् MahāBhā. i. 19. 16; स नरके